Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 2 | ISSN : 2582-0095

# ध्वन्यालोककार: आनन्दवर्धनाचार्य: ध्वन्यालोकस्य गुणसङ्घटनयो: परामर्श:

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य,
(पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**शोधसारांश:-** आनन्दवर्धनेन प्रतिपादिता इयं सङ्घटना विभिन्नानां आलङ्कारिकाणां मतानुगुणं विभिन्नै: नामभि: अवलोक्यते । मुख्यतया मार्ग:, रीति: वृत्ति:, सङ्घटना इति नामभि: पदविन्यासस्य निरूपणं कृतम् अवलोक्यते । काव्यालङ्कारसूत्रवृत्तिकार: आचार्य: वामन: इमां सङ्घटनां रीतिरिति प्रोवाच । तच्चोक्तं यथा विशिष्टापदरचनारीति: इति । तन्मतानुसारं वैदर्भी, गौडीया, पाञ्चालीतिरीति: त्रिविधा । तदुक्तं –सा त्रेधा, वैदर्भी गौडिया पाञ्चाली, चेति' इति । अपि च रचनायाम् इयं विशेषता गुणानामवस्थित्या भवति। गुणानामुपरि रीतेरवलम्बनात् क्वचिदिदं रीतिमतं गुणसम्प्रदाय: इति नाम्नापि व्यवह्रियते ।

**मुख्यशब्दा:-** मार्ग:, रीति: वृत्ति:, सङ्घटना, वैदर्भी, पाञ्चाली, आचार्य: दण्डी, मम्मट: ।

---

ध्वन्यालोककार: आनन्दवर्धनाचार्य: ध्वन्यालोकस्य तृतीये उद्योते अलक्ष्य- क्रमव्यङ्ग्यनिरूपणावसरे सङ्घटनां निरूपयति । तत्र च तेन उक्तमस्ति यथा-

**यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।**
**वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ' ॥**

आनन्दवर्धनेन ध्वन्यालोके सङ्घटनासामान्यलक्षणं न प्रोक्तम्। किन्तु एतेन सङ्घटना इतीदं पदं वामनादिभि: प्रयुक्ताया: रीते: पर्यायरूपेण प्रयुक्तम् अवलोक्यते । अपि च सङ्घटना इतीदं पदं ध्वनिकारं विहाय प्राय: नान्येन आलङ्कारिकेण पूर्वं प्रयुक्तम् । सङ्घटना इत्येतस्य पदस्य उल्लेख: वाक्यपदीये अपि अवलोक्यते । तत्र च उक्तमस्ति यथा – "जातिरनशिधीयमानापि सम्बन्धव्युत्पत्त्यर्थमवश्यमुपलक्षणत्वेना- पेक्षणीयेति तन्नि बन्धना सरूपाणां सङ्घटना 2" इति । तत्र च असमासा, मध्यमसमासा, दीर्घसमासा इति त्रिविधांसङ्घटनां निरूपयति आनन्दवर्धन: । तच्चोक्तम् यथा-

**असमासा समासेन मध्यमेन च भूषिता ।**
**तथा दीर्घसमासेति त्रिधा सङ्घटनोदिता ॥**

आनन्दवर्धनेन प्रतिपादिता इयं सङ्घटना विभिन्नानां आलङ्कारिकाणां मतानुगुणं विभिन्नै: नामभि: अवलोक्यते । मुख्यतया मार्ग:, रीति: वृत्ति:, सङ्घटना इति नामभि: पदविन्यासस्य निरूपणं कृतम् अवलोक्यते । काव्यालङ्कारसूत्रवृत्तिकार: आचार्य: वामन: इमां सङ्घटनां रीतिरिति प्रोवाच । तच्चोक्तं यथा विशिष्टापदरचनारीति: इति । तन्मतानुसारं वैदर्भी, गौडीया, पाञ्चालीतिरीति: त्रिविधा । तदुक्तं –सा त्रेधा, वैदर्भी गौडिया पाञ्चाली, चेति' इति । अपि च रचनायाम् इयं विशेषता गुणानामवस्थित्या भवति। गुणानामुपरि रीतेरवलम्बनात् क्वचिदिदं रीतिमतं गुणसम्प्रदाय: इति नाम्नापि व्यवह्रियते । आचार्य:

वामनः दश शब्दगुणान् दश अर्थगुणान् च निरूप्य रीतित्रयस्यापि लक्षण निरूपितवान् । तत्र च समग्रगुणा वैदर्भी, ओजः कान्तिमती गौडीया, माधुर्यसौकुमार्योपपन्ना पाञ्चाली" इति च तिसृणां रीतीनां स्वरूपं ब्रूते । वक्रोक्तिजीवितकारः कुन्तकः इमां सङ्घटनां मार्गनाम्ना व्यवहृतवान् । तन्मतानुसारंसु कुमारमार्गः, विचित्रमार्गः, मध्यममार्गश्चेतित्रयः काव्यमार्गाः । तच्चोक्तं यथा–

**सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः ।**

**सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः ॥**

काव्यादर्शकारः आचार्यः दण्डी अपि इमां सङ्घटनां मार्गमाह । तन्मतानुसारं वैदर्भी गौडीया इति च द्वौ मार्गौ । तेन च उक्तं यथा–

**अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्।**

**तत्र वैदर्भगौडीयौ वर्ण्यते प्रस्फुटान्तरम् । इति ।**

साहित्यदर्पणकारः कविराज : विश्वनाथः वैदर्भी, गौडीया, पाञ्चाली, लाटी चेति रीतीनां चातुर्विध्यमाह । तेनोक्तम् । यथा –

**पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।**

**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ।।**

**वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।**

**माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥**

**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ।**

**ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥**

**समासबहुला गौडी वर्णैः शेषैः पुनर्द्वयोः ।**

**समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥**

**लाटी तु रीतिवैदर्भीपाञ्चाल्योरन्तरे स्थिता ।। ' इति ।**

सरस्वतीकण्ठाभरणकारेण उक्तम् यथा–

**वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः ।**

**रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ।। इति ।**

तेन च वैदर्भी, पाञ्चाली, गौडिया, आवन्तिका, लाटीया, मागधी चेति रीतीनां षोढात्वं निरूपितम् । उक्तम् च यथा– 1

**वैदर्भी साथ पाञ्चाली गैडीयावन्तिका तथा ।**

**लाटीया मागधी चेति षोढा रीतिर्निगद्यते ' ॥ इति ।**

काव्यप्रकाशकारः मम्मटः वृत्यनुप्रासनिरूपणप्रसङ्गे रीतिं वृत्तिं च समानरूपेण प्रोक्तवान् । तेन च तत्र उक्तमस्ति यथा

" एतास्तिस्त्रो वृत्तयः वामनादीनां वैदर्भीगौडीपाञ्चाल्याख्यो मताः' इति । तेन च उपनागरिका, परुषा, च तिस्रः वृत्तयः प्रोक्ताः । तेनोक्तम् यथा–

**माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।**

**ओजः प्रकाशकैस्तैस्तु परुषा कोमला परैः ॥ इति । कोमला इति**

काव्यमीमांसाकारः राजशेखरः "तत्र वेषविन्यासक्रमः प्रवृत्ति, विलासविन्यासक्रमो वृत्तिः, वचनविन्यासक्रमो रीतिः "" इत्याह । पुनश्च सः वैदर्भी, गौडीया, पाञ्चालीति रीतित्रितयं प्रोवाच' । ध्वन्यालोककारः आनन्दवर्धनस्तावत् अत्यन्तं विशदतया गुणसङ्घटनयोः पार्थक्यं, आधाराधेयभावसम्बन्धं च परामृशति । तत्र ध्वन्यालोकस्य तृतीयोद्योते सर्वप्रथमं कानामसङ्घटना इति जिज्ञासायां ब्रूते यथा –गुणानाश्रित्य तिष्ठन्तीमाधुर्यादीन्व्यनक्तिसा ।। इति । एवञ्च सङ्घटनागुणानाश्रित्य तिष्ठन्ती रसादीन्व्यनक्तीति तात्पर्यम्। प्रकरणेऽस्मिन्वामन भट्टोद्भटप्रभृतीनां मतानि खण्डयति ध्वनिकारः । सन्दर्भेऽस्मिन्सर्वादौ विक्पपद्वयम् उपन्यस्यति ध्वन्यालोककारः । गुण–

सङ्घटनयोः अभेदः इति आदमिः, गुणसङ्घटनयोः भेदः इति द्वितीयः । भेदे पुनः गुणाश्रिता सङ्घटना, सङ्घटनाश्रिताः गुणाः इति विकल्प द्वयम् । तत्र गुणसङ्घटनयोः अभेदपक्षेगुणान् आत्मभूतान्कृत्वातिष्ठति सङ्घटना । सङ्घटनाश्रित गुणपक्षे च आधेयभूताः गुणाः, आधारश्चसङ्घटना । अत्र च गुणसङ्घटनयोः ऐक्यमितीदं वामनमतम् । तच्च उच्यते–रीतिरात्माकाव्यस्य इति । एतन्मतानुसारं काव्यस्य आत्मारीतिः । अत्र च वा – मनेन प्रधानः इत्यस्मिन् अर्थे आत्मपदं प्रयुक्तम् । तर्हि केयं रीतिः इति चेत् उच्यते – विशिष्टापदरचनारीतिः इति । एवञ्च विशेष युक्ता पदानांरचनारीतिः इति तन्मतम् । कोऽसौ विशेषः इति ब्रूते – विशेषो गुणात्मा इति । गुणाश्च श्लेषप्रसादादयः । एवञ्च अनेन गुणसङ्घटनयोः ऐक्यपक्षः प्रतिपादितः अवलोक्यते वामनेन । तत्र गुणसङ्घटनयोः भेदपक्षः द्वितीयः । पक्षेऽस्मिन्सङ्घटनाश्रिताः गुणाः इति भट्टोद्भटमतम्। किन्तु आनन्दवर्धनः एतत्मतद्वयमपि खण्डयित्वा स्वकीयं तृतीयं मतं सिद्धान्तरूपेण उपस्थापयति । अत्र च एतदनुसारं यदिगुणसङ्घटनयोः अभेदपक्षः सङ्घटनाश्रिताः गुणाः इति पक्षः वा स्वीक्रियते तर्हि गुणानामनियतत्त्वम् आपतति । वस्तुतः गुणास्तावनियताः । माधुर्यप्रसादयोः गुणयोः प्रकर्षः करुणरसस्य विप्रलम्भ शृङ्गारस्य विषयः, ओजोगुणः च रौद्राद्धतादिविषयः । एवं गुणनियमस्तावत्व्यस्थितः । किन्तु सङ्घटनायास्तावत् अयं नियमः विघटते । यतो हि शृङ्गाररसे दीर्घसमासा सङ्घटना रौद्रादिषु च असमासा सङ्घटना अवलोक्यते । तद्यथा–

**अनवरतनयनजललवनिपतनपरिमुषितपत्रलेखंते ।**

**करतलनिषण्णमबलेवदनमिदंकंनतापयति ॥ इति**

प्रणयकुपितनायिका प्रसादनाय कस्य उक्तिरियम् । एवञ्चात्र शृङ्गाररसः । किन्त्वत्र दीर्घसमासासङ्घटना अवलोक्यते । अपिच–

**योयः शस्त्रं बिभर्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां**

**योयः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतोवा ।**

**यो यस्तत्कर्मसाक्षी चरिति मयि रणे यश्च यश्च प्रतीपः**

**क्रोधान्धस्तस्य तस्य स्वयमिहजगतामन्तकस्यान्तकोऽहम् ॥**

इतीयम्, द्रोणवधं ज्ञात्वाकुपितस्य अश्वत्थाम्नः उक्तिः । किन्त्वत्ररौद्ररसस्य पद्ये असमासा सङ्घटनाऽवलोक्यते । तस्मात्गुणाः न सङ्घटनास्वरूपाः न वा सङ्घटनाश्रयाः इति आनन्दवर्धनमतम्। तर्हि किं स्वरूपाः इमे गुणाः इति जिज्ञासायाम् आह-

**तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः ।**

**अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ' ॥ इति ॥**

गुणास्तावत् अङ्गिनं प्रधानं रसम् आश्रयन्ते, अतः रसधर्माः गुणाः, अलङ्ककारास्तु कटककुण्डलादिवत्शरीराश्रयाः इति फलितोऽर्थः ।

एवं ध्वनिकारः ध्वन्यालोकस्य तृतीयोद्योते असंलक्ष्यक्रमव्यङ्ग्यनिरूपणावसरे गुणसङ्घटनयोः पार्थक्यं प्रतिपाद्य आधाराधेयभावं विशदतया परामृशति ।

**सन्दर्भग्रन्थाः**


1. ध्वन्यालोकः- चौखम्बा विद्याभवन, वाराणसी
2. काव्यालङ्कारसूत्रवृत्तिः - Sri Vani Vilas press, Srirangam, 1990
3. वक्रोक्तिजीवितम् - Firma KI Mukhopadhyay, Calcutta, 1961
4. काव्यादर्श :- Bhandarkar Oriental Research Institute, Pune, 1938
5. साहित्यदर्पणः- चौखम्बा संस्कृत संस्थान, वाराणसी
6. सरस्वतीकण्ठाभरणम् - Nirnay Sagar Press, Bombay, 1934
7. काव्यप्रकाश :- Bhandarkar Oriental Research Institute, Pune, 1933
8. काव्यमीमांसा - Oriental Institute, Baroda, 1934
9. वाक्यपदीयम्- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी